स्रुवा, स्त्री, (स्रु+कः । टाप् ।) शल्लकी । मूर्व्वा । इति मेदिनी ॥ (स्रुक् । इति च मेदिनी ॥ अस्याः पर्य्यायो यथा,—
"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा । मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
स्रुवाहृचः, पुं, (स्रु वायाः हृचः ।) विकङ्कतवृचः । इत्यमरः ।२।४।३७॥ (अथास्य पर्य्यायाः यथा. भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । "विकङ्कतः स्रुवावृचो ग्रन्थिलः स्वादुकण्टकः । स एव यज्ञवृचश्च कण्टकी व्याघ्रपादपि" ॥)
स्रुः, स्त्री, (स्रु स्रुतौ+"क्विप् वचिप्रच्छीति ।" उणा० २ । ५७ । इति क्विप् दीर्घश्च ।) यज्ञपात्रविशेषः । स्रवति घृतादिकमस्याः । इत्यमरटीकायां भरतः । २।७।२५ ॥ निर्झरः । यथा, "स्रूः स्रवे निर्झरेऽपि च ।" इति हेमचन्द्रः ॥
स्रै, पचि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट् ।) रेफयुक्तः । स्रायति । पचि पाके । इति दुर्गादासः ॥
स्रोतं, क्ली, स्रोतः । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ३ । ६८ । १३ ।
"पतिशोकाकुलां दीनां शुष्कस्रोतां नदीमिव ॥"
पुंलिङ्गान्तोऽयमिति उणादिटीकायां उज्ज्वलदत्तः । ४ । २०१ ॥)
स्रोतः, [स्] क्ली, (स्रवतीति,। स्रु गतौ+"स्रुरीभ्यां तुट् च ।" उणा० ४ । २०१ । इति असुन् । तुट् च ।) स्वतोऽम्बुसरणम् । इत्यमरः । १ । १० । ११॥ वेगेन जलवहनं स्रोतः । स्वतः स्वयमम्बुनः सरणं गमनं स्रोतः इत्यन्वयः । स्वत इत्यात्महेतुकं न परहेतुकम् । तस् लेरिति तृतीयायास्तस् स्रवति स्रोतः स्रुदुवत् त्रासुषिति अस् निपातनात्तन् स्रोतः सान्तम् । स्रोतः सद्यः सकलसलिलं सिंहकं सक्तमूलम् । इति दन्त्यादावुष्मभेदः । स्रोतमदन्तञ्च । स्रोतः स्रोतं महानदः स्रवः पैञ्चषमस्त्रियाम् । इति रुद्रचन्द्रः । इत्यमरटीकायां भरतः ॥ (यथा, आर्य्यासप्तशत्याम् । ४८१ ।
"रहस्वरसप्रसरस्यालिमिरये नतं प्रियं प्रति मे । स्रोतस इव निम्नं प्रतिरागस्य द्विगुण आवेगः ॥")
नदी । यथा, गीतायाम् । १० । ३१ ।
"झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥"
शरीरस्थनवच्छिद्राणि । (मनःप्राणान्नपाणीयादिव हशरीरस्थासंख्यमार्गविशेषः । इति भावप्रकाशादयः ॥) यथा,—
"स्रोतांसि खानि छिद्राणि कालखण्डं यकृत् तम् ॥"
इति राजनिर्घण्टः ॥
("यावन्तः पुरुषे मूर्त्तिमन्तो भावविशेषास्तावन्त एवास्मिन् स्रोतसां प्रकारविशेषा सर्व्वभावा हि पुरुषेषान्तरेण स्रोतांस्यभिनिर्व्वर्त्तन्ते चयं वा न गच्छन्ति । स्रोतांसि खलु परिणाममापद्यमानानां धातूनामभिवाहीनि भवन्ति अयनार्थेनापि चैके स्रोतसामेव समुदायं पुरुषमिच्छन्ति सर्व्वगतत्वात् सर्व्वसरत्वाच्च दोषप्रकोपप्रशमानानां नत्वेतदेवं यस्य सन्ति स्रोतांसि यत्र वहन्ति यच्चावहन्ति यत्र चावस्थितानि सर्व्वं तदन्येभ्यः । अतिबहुत्वात्तु खलु केचिदपरिसङ्ख्येयानि आचक्षते स्रोतांसि परिसङ्ख्येयानि पुनरन्ये तेषां स्रोतसां यथास्थूलं कतिचित् प्रकारान् मूलतश्च प्रकोपपरिज्ञानतश्चानुव्याख्यास्यामः ये भविष्यन्त्यलमनुक्तार्थज्ञानवते विज्ञानाय चाज्ञानाय तद्यथा. प्राणोदकान्नरसरुधिरमांसमेदोऽस्थि-मज्जाशुक्र-मूत्रपुरीषस्वेदवहानि वातपित्तश्लेष्मणां पुनः सर्व्वशरीरचराणां सर्व्वस्रोतांसि अयनभूतानि । तद्वदतीन्द्रियाणां पुनः सत्त्वादीनां केवलं चेतनावत् शरीरमयनभूतमधिष्ठानभूतञ्च तदेतत् स्रोतसां प्रकृतिभूतत्वात् न विकारैरुपसृज्यते शरीरम् ।" इति चरके विमानस्थाने पञ्चमाध्याये ॥)
स्रोतईशः, पुं, (स्रोतसामीशः ।) समुद्रः । इति हेमचन्द्रः ॥
स्रोतस्यः, पुं, शिवः । चौरः । स्रोतःशब्दात् यत्प्रत्ययेन निष्पन्नः । इति केचित् ॥ (स्रोतसि भवः । स्रोतस्+"स्रोतसो विभाषाड्ड्यौ ।" ४ ।४ । ११३ । इति यः । स्रोतोभवे, त्रि । इति काशिका ॥)
स्रोतस्वती, स्त्री,(स्रोतोऽस्त्यस्यामिति । मतुप् । मस्य वः । उगितश्चेति ङीप् ।) नदी । इत्यमरः । १ । १० । ३० ॥
स्रोतस्विनी, स्त्री,(स्रोतोऽस्त्यस्यामिति । स्रोतस्+"अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ।) नदी । इत्यमरटीकायां भरतः । १ । १० । ३० ॥
स्रोतोऽञ्जनं, क्ली, (स्रोतोभवमञ्जनम्) यमुनास्रोतोभवाञ्जनम् । तत्पर्य्यायः । सौवीरम् २ कापोताञ्जनम् ३ यामुनम् ४ इत्यमरः । २।९ । १०० ॥ अज्यते नयनमनेन चक्षुष्यत्वादञ्जनं अनट् । यमुनायाः स्रोतोभवत्वात् स्रोतसोऽञ्जनं स्रोतोऽञ्जनम् । सुवीरदेशे भवं सौवीरं अण् । स्रोतोऽञ्जनादिलक्षणं सौवीरमिति ख्यातम् । अदूरभवत्वाद्देशेऽपि एकत्वोपनिबन्धनमिति सुभूतिः । कपोतस्यायं कापोतो वर्णः तद्युक्तमञ्जनं कापोताञ्जनम् । कापोतवर्णमञ्जनं कापोताञ्जनमिति स्वामी । यमुनायां भवं यामुनं अण् । इति तट्टीकायां भरतः ॥ * ॥ अपरञ्च ।
"स्रोतोऽञ्जनं नदीजञ्च कृष्णं श्वेतञ्च लोहितम् ॥"
इति रत्नमाला ॥
तत्पर्य्यायान्तरं यथा । वारिभवम् ५ स्रोतोभवम् ६ स्रोतनदीभवम् ७ सौवीरसारम् ८ कपोतसारम् ९ वल्मीकशीर्षम् १० । अस्य गुणाः । शीतत्वम् । कटुत्वम् । कषायत्वम् । क्रिमिनाशित्वम् । रसायनत्वम् । रसे योग्यत्वम् । स्तम्भहिकरत्वञ्च । तस्य लक्षणं यथा,—
"वल्मीकशिखराकारं भिन्नं नीलाञ्जनप्रभम् । घृष्टे च गैरिकावर्णं श्रेष्ठं स्रोतोऽञ्जनञ्च तत् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"स्रोतोऽञ्जनं मतं श्रेष्ठं विशुद्धं सिन्धुसम्भवम् । दृष्टे कण्डूमलहरं दाहक्लेदरुजापहम् ॥ अक्ष्णो रूपावहञ्चैव सहते मारुतातपौ । नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत् ॥"
स्रोतोऽञ्जनं कृष्णं सुरमा इति । शोधनं विनापि सिन्धुनामपर्व्वतस्थान भवम् । इति ।
अथ सुरमा सौवीर ।
"अञ्जनं यामुनञ्चापि कापोताञ्जनमित्यपि । तत्र स्रोतोऽञ्जनं कृष्णं सौवीरं श्वेतमीरितम् ॥ स्रोतोऽञ्जनसमं ज्ञेयं सौवीरं तत्तु पाण्डुरम् । स्रोतोऽञ्जनं स्मृतं स्वादु चक्षुष्यं कफपित्तनुत् ॥ कषायं लेखनं स्निग्धं ग्राहि छर्द्दिविषापहम् । सिध्मक्षयास्रहृच्छीतं सेवनीयं सदा बुधैः ॥ स्रोतोऽञ्जनगुणाः सर्व्वे सौवीरेऽपि मता बुधैः । किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम् ॥"
इति च भावप्रकाशः ॥
स्रोतोवहा, स्त्री, (वहतीति । वह+अच् । टाप् । स्रोतसो वहा ।)नदी । इति जटाधरः ॥(यथा, रघुः । ६ । ५२ ।
"नृपं तमावर्त्तमनोज्ञनाभिः
सा व्यत्यगादन्यवधूर्भवित्री ।
महीधरं मार्गवशादुपेतं
स्रोतोवहा सागरगामिनीव ॥")
स्वं, पुं, क्ली, (स्वन शब्दे+अन्येभ्योऽपीति डः ।) धनम् । इत्यमरः । ३ । ३ । २१० ॥ (यथा, मनुः । ८ । ४१७ ।
"विस्रब्धं ब्राह्मणः शूद्रात् द्रव्योपादनमाचरेत् । नहि तस्यास्ति किञ्चित् स्वं भर्त्तृहार्य्यधनो हि सः ॥"
स्वं, त्रि, आत्मीयम् । इत्यमरः । ३ । २१० ॥ (यथा, कथासरित्सागरे । २६ । १०५ ।
"मया त्वञ्च प्रवेष्टव्या स्वा तनुश्च पुरी च सा ॥")
स्वः, पुं, ज्ञातिः (यथा, मनुः । ५ । १०४ ।
"न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् । अस्वर्ग्या ह्याहुतिः सा स्यात् शूद्रसंस्पर्शदूषिता ।")
आत्मा । इत्यमरः । ३ । ३ । २१० ॥ (यथा, रघुः । २ । ५५ ।
"सेयं स्वदेहार्पणनिष्क्रयेण
न्याय्या मया मोचयितुं भवत्तः ॥"
विष्णुः । इति महाभारतम् । १३ । १४९ । ११७ ॥)
स्वकं त्रि, (स्वमेव । कन् ।) स्वीयम् । आत्मीयम् । यथा,—
"नाष्टिकञ्चैव कुरुते तवनं ब्राह्मभिः स्वकम् । अदत्तत्यक्तविक्रीतं ज्ञात्वा स्वं लभते धनी ॥"
इति प्रायश्चित्ततत्त्वम् ॥
स्वकम्पनः, पुं, (स्वेनैव कम्पते इति । कम्प+युः) वायुः । इति शब्दरत्नावली ॥